http://www.sgbauonline.com/



**B.A. (Part-I) Semester-I Examination**

**SANSKRIT (Compulsory)**

**(Modern Indian Language)**

वेळ : 3 तास] [एकूण गुण : 80

**Note :—** (1) **All** questions are compulsory.

(2) Write answers in the medium offered.

**सूचना :—** (1) **सर्व** प्रश्न अनिवार्य आहेत.

(2) उत्तरे स्वीकृत माध्यमातून लिहावीत.

**सूचना :—** (1) **सभी** प्रश्न अनिवार्य हैं।

(2) उत्तर स्वीकृत माध्यम में लिखिये।

1. (अ) Translate any **TWO** of the following : 10

खालीलपैकी कोणत्याही **दोन** उताऱ्यांचा अनुवाद करा :

किसी **दो** पाठ्यांशों का अनुवाद करें :

(1) गृध्रोऽवदत्—मार्जारो हि मांसरुचि:। पक्षिशावकाश्चात्र निवसन्ति ! तेनाहमेवं ब्रवीमि। तत् श्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति। ब्रूते च मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम्। परस्परं विवदमानानामपि धर्मशास्त्राणाम् 'अहिंसा परमोधर्म:।' इत्यत्रैकमतम्।

(2) एवं विश्वास्य स मार्जारस्तरू कोटरे स्थित: ततो दिनेषु गच्छासु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति। येषामपत्यानिखादितानि तै: शोकार्तै: विलयद्भिरितस्ततो जिज्ञासा समारब्धा। तत्परिज्ञाय मार्जार: कोटरान्निसृत्य बहि: पलायित:। पश्चात्पक्षिभिरितस्ततो निरूपयद्भिस्तरूकोटरे शावकास्थीनि प्राप्तानि। अनन्तरमनेनैव जरद्गवेन शावका: खादिता: इति निश्चित्य गृध्रो व्यायादित:।

(3) अशोक:—को दोषो मम ? देवि एष ममैव दोष: हा धिक् हा धिक् केन प्रकारेंणेदै प्रक्षालनम्। (नीरांजनं प्रत्यवलोक्य) अपनीयतामपनीपतामेत्तानि नीराजनयात्राणि। मम दृष्टिपातस्थलोड पि न स्थापनीयान्येतानि। एतेषु नीरांजनापात्रेषु निहितेषु कराडवर्णं कुंकुमं रणभूमौ प्रतितहत्तानां वीराणां प्रत्यंगान्निर्गतानि रुधिरस्त्रोतानि स्मारयति मे।

(4) अशोक:—वत्सौ ! संन्यासी न्यग्रोधो युवयो: पितृव्यपुत्रोऽस्ति। गच्छतं शीघ्रमानयतं तं ज्येष्ठभ्रातरे।

कन्या—आवयो: पितृव्यपुत्र: कथं स: ? कथं च संन्यासी जात:।

अशोक:—कथयिष्यामि अनन्तरम्।

पुत्र:—तथा आनयावस्तमत्र।

अशोक:—न्यग्रोधात् बुद्धदीक्षां ग्रहिष्यामितस्य राज्यं प्रतियच्छामि च तस्मै। देवी ! एष एव पापक्षालनोपायो मम।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(ब) Which lesson we learn from 'गृध्रमार्जार कथा' ? 6

गृध्रमार्जार कथेतून आपल्याला कोणती शिकवण घेता येते ?

गृध्रमार्जार कथा से हमें क्या सीख मिलती है ?

**OR/किंवा/अथवा**

Why did अशोक accept बुद्धधर्मः ?

सम्राट अशोकांनी बुद्धधर्माचा स्वीकार कां केला ?

सम्राट अशोक ने बुद्धधर्म को स्वीकार क्यों किया ?

2. (अ) Translate any **TWO** of the following : 10

खालीलपैकी कोणत्याही दोन उताऱ्यांचा अनुवाद करा :

किसी दो पाठ्यांशों का अनुवाद कीजिये :

(1) १९८२ तमे खिस्ताब्दे सा पञ्जाब अभियांत्रिक महाविद्यालयतः एरोनॉटिकल इंजिनिअरिंग इत्यस्मिन् विषये विशेष प्राविण्यमधिगतवती। तदनन्तरं सा अस्मिन्नेव क्षेत्रे अधिकं ज्ञानमाप्तुमैच्छत्। अतः पित्रा सा अमेरिकां प्रेषिता। १९८४ तमे खिस्ताब्दे सा अमेरिका देशस्य टेक्सास विद्यापीठतः स्नातकोत्तर उपाधी लब्धवती।

(2) १९९७ तमे खिस्ताब्दे नोव्हेंबर मासस्य १९ दिनाङ्के सा प्रथमवारं अवकाशं गतवती। तस्याः प्रथमा अवकाशयात्रा महती सफला जाता। तस्या अदम्य साहसं दृष्ट्वा नासा संस्थया तस्याः द्वितीयवारं चयनं कृतम्। अधिकस्य अधिकं फलं स्वश्रमेणैव लभते। एतस्यां यात्रायां तया सह अन्ये षट् सहयात्रिणः आसन्।

(3) आः ! किं कुर्यात् स वराकः ? पुरतः एव मोनाली उपविशति। किमेव छिन्नच्छादनो भूत्वा तस्याः पुरस्तात् संचरेत् ? एतादृशं पुच्छं धारयित्वा ? ससाध्वसं किंकर्तव्यमूढ स तथैव स्थितः। तत्र केबिनतः घण्टारवं वारंवारं निनदति। अन्ततोगत्वा आवेशवशात् मुखस्थं सम्पूर्ण तमाखुरसं सकृदेव निर्गीर्य धमधमायमान पदैः तथैव युतकयुच्छिका मवलम्ब्य स केबिनमध्ये प्रविष्टः।

(4) आम् भवति क्षतिपूर्ति हेतुकम् आवेदनपत्रमेकं लिखतु। अहमनुमति प्रदाय अग्रे प्रेषयामि। किं केवलं 'भवती' इति वदति भवान् ? किं ममाऽपि हानिः नाभूत् ? अहमपि आवेदनपत्रं लिखामि। मह्यमपि भवता अनुमती प्रदातव्या एव। इति बल्लूप्रसादः साटोपं गर्जति।

आम् ! आम् ! सर्वेऽपि वस्त्राणि नाशयेयुः। क्षतिपूर्तिराशिं प्राप्नुयुः।

(ब) Describe the achievements of 'कल्पना चावला' according to lesson. 6

पाठाच्या आधारे कल्पना चावलाचे कार्य वर्णन करा.

पाठ के आधार से कल्पना चावला का कार्य वर्णन करें।

**OR/किंवा/अथवा**

Describe the nature of people in the office according to the lesson 'कस्यचित् कीलकस्य'.

कस्यचित् कीलकस्य धड्यातील विविध व्यक्तींचे स्वभाव स्पष्ट करा.

कस्यचित् कीलकस्य पाठ से विविध व्यक्तियों के स्वभावों को स्पष्ट कीजिये।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

3. (अ) Translate any **TWO** of the following श्लोकs : 10

खालीलपैकी कोणत्याही **दोन** श्लोकांचा अनुवाद करा :

किन्हीं **दो** श्लोकों का अनुवाद कीजिये :

(1) भिक्षुरूपप्रतिच्छन्नं सुग्रीवप्रियकारणात्
ऋष्यमूकादिह प्राप्तं कामगं कामचारिणम्।
एवमुक्त्वा तु हनुमांस्तौ वीरौ रामलक्ष्मणौ
वाक्यज्ञो वाक्यकुशलः पुनर्नोवाच किंचन।

(2) विदितानौगुणा विद्वन् सुग्रीवस्यमहात्मनः
तमेव चावां मार्गावः सुग्रीवं प्लवगेश्वरम्।
यथा ब्रवीमि हनुमन् सुग्रीववचनादिह
तत् यथा हि करिष्यावो वचनात् तव सत्तम।

(3) सम्पूर्ण कुम्भो न करोति शब्दम्।
अर्धो घटोघोषमुपैति नूनम्।
विद्वान् कुलीनो न करोति गर्वं
जल्पन्ति मूढास्तु गुणैर्विहीनाः।

(4) वृक्षाग्रवासी न च पक्षिराजः।
त्वग्वस्त्रधारी न च सिद्धयोगी।
त्रिनेत्रधारी न च शूलपाणि।
जलं च बिभ्रन्न घटो न मेघः।

(ब) Explain the importance of speech in life.

जीवनातील वाणीचे महत्व स्पष्ट करा.

जीवन में वाणी का महत्व स्पष्ट कीजिये।

**OR/किंवा/अथवा**

Explain the importance of 'सुभाषितs'.

सुभाषितांचे महत्व स्पष्ट करा.

सुभाषितों का महत्व स्पष्ट कीजिये।

4. (अ) Translate any **TWO** of the following श्लोकs :

खालीलपैकी कोणत्याही **दोन** श्लोकांचा अनुवाद करा :

किन्हीं **दो** श्लोकों का अनुवाद कीजिये :

(1) यस्तु वृक्ष प्रकुरूते छायापुष्पफलोपगम्।
पथि देवालयेचाऽपि पापात्तारयते पितृण्।
अपुत्रस्यहि पुत्रत्वं पादपा इह कुर्वते।
यत्नेनापि च विप्रेन्द्रा अश्वत्थारोपणं कुरू।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(2) मुक्तिहेतुः सहस्राणां लक्षकोटीनि यानि च।
धनी चाश्वत्थवृक्षे च अशोकः शोकनाशनः।
प्लक्षो भार्याप्रदश्चैव बिल्व आयुष्यदः स्मृतः।
धनप्रदो जम्बुवृक्षो ब्रह्मदः प्लक्षवृक्षकः।।

(3) अहिंसा सत्यमक्रोध इति यस्मात्त्र्यक्षकत्रयम्।
तस्मै सत्याग्रहाख्याय त्र्यंबकाय नमोनमः।
नमः स्वातंत्र्यरूपाय देवाय परमात्मने।
यत्कटाक्षविलासेन लीयन्ते दैन्यराशयः।

(4) वीथयः सिक्तसंमृष्टाश्चारुपल्लवतोरणाः।
गृहा राष्ट्रध्वजै रम्यैर्भूषणैश्च विभूषिताः।
अभ्यनन्दन् जयालोकैर्जनास्तेजस्विनं मुनिम्।
उदयोन्मुखमारावैर्भास्वन्तमिव पक्षिणः।।

(ब) Explain the various uses of trees according to lesson. 6
पाठाच्या आधारे वृक्षांचे विविध उपयोग स्पष्ट करा.
पाठ के आधार पर वृक्षों के विविध उपयोग स्पष्ट कीजिये।

**OR/किंवा/अथवा**

Write the preparation of 'गांधीजन्मोत्सव'.
गांधीजन्मोत्सवाच्या तयारीचे वर्णन करा.
गांधीजन्मोत्सव हेतु की गयी तैयारियों का वर्णन करें।

5. Solve any **16** from following : 16
कोणत्याही **सोळा** प्रश्नांची उत्तरे लिहा :
किसी **16** प्रश्नों के उत्तर लिखें

(1) कस्य हत्यां दृष्ट्वा महर्षेः शोकं श्लोकत्वं प्राप्तम् ?
(i) क्रौञ्चस्य (ii) मृगस्य
(iii) शावकस्य (iv) जृम्भकस्य

(2) दशरथेन पुत्रप्राप्त्यर्थे कः यज्ञः कृतः ?
(i) राजसूयः (ii) सोमयागः
(iii) अश्वमेधः (iv) अग्निहोत्रम्

(3) श्रीहनुमान् कस्य अंशः आसीत् ?
(i) इन्द्रस्य (ii) वायोः
(iii) वरुणस्य (iv) बृहस्पतेः



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(4) भरतस्य मातुः नाम किम् ?

(i) सुमित्रा (ii) कौसल्या

(iii) जानकी (iv) कैकेयी

(5) श्रीविश्वामित्रमुनिना श्रीरामलक्ष्मणाभ्यां के विद्ये शिक्षिते ?

(i) न्यायविद्या (ii) बला अतिबला च

(iii) सामर्थ्य धैर्य च (iv) शस्त्रास्त्रविद्या

(6) शत्रुघ्नस्य भार्यायाः नाम किम् ?

(i) जानकी (ii) उर्मिला

(iii) श्रुतकीर्ति (iv) वैदेही

(7) भरतस्य मातुलः युधाजित् कस्य देशस्य राजा आसीत् ?

(i) अयोध्यायाः (ii) विदेहस्य

(iii) उज्जयिन्याः (iv) केकयस्य

(8) कैकय्याः द्वितीयवरदाने किम् याचितम् ?

(i) भरताय राज्यम् (ii) लक्ष्मणाय वनवासः

(iii) शत्रुघ्नाय राज्यम् (iv) न किमपि

(9) श्रीरामेण वनवासस्य प्रथमा रात्रिः कस्याः नद्यः तीरे यापिता ?

(i) तमसा (ii) यमुना

(iii) मुरला (iv) गङ्गा

(10) श्रीराम-भरतमेलनं कस्मिन् पर्वते अभवत् ?

(i) मेरूः (ii) चित्रकूटः

(iii) हिमालयः (iv) विन्ध्यः

(11) श्रीरामस्य प्रतिनिधीरूपेण भरतः कुत्र अवसत् ?

(i) अयोध्यायाम् (ii) नन्दीग्रामे

(iii) विदेहनगर्याम् (iv) काशीनगर्याम्

(12) श्रीरामलक्ष्मणाभ्याम् खरदूषणस्य वधं कुत्र कृतम् ?

(i) जनस्थाने (ii) अरण्ये

(iii) मन्दिरे (iv) श्मशाने

(13) सीताहरणार्थं रावणः कस्मिन् वेषे आगतवान् ?

(i) राज्ञः (ii) साधोः

(iii) कर्मकारस्य (iv) याज्ञिकस्य

(14) मतङ्गाश्रमे श्रीरामाय का वृद्धा तामसी मिलिता ?

(i) जानकी (ii) श्रुतकीर्ति

(iii) शबरी (iv) गौतमी



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(15) सुग्रीवस्य सख्यं स्वीकृत्य श्रीरामेण कस्य वधस्य प्रतिज्ञा कृता ?

(i) जनकस्य (ii) वाले:

(iii) भरतस्य (iv) रावणस्य

(16) वालीसुग्रीवयो: राजधान्या: नाम किम् ?

(i) विदेहनगरम् (ii) उज्जयिनी

(iii) किष्किंधा (iv) काशी

(17) हनुमत: मार्गे का छायाग्राहिका राक्षसी मिलिता ?

(i) शूर्पणखा (ii) सिंहिका

(iii) जम्बूकी (iv) मन्दोदरी

(18) श्रीरामेण पश्चिमद्वारे सेनापतीरूपेण कस्य स्थापना कृता ?

(i) हनुमत: (ii) लक्ष्मणस्य

(iii) सुग्रीवस्य (iv) भरतस्य

(19) पुष्पकविमानं रावणेन कस्मात् हस्तगतं कृतम् ?

(i) इन्द्रात् (ii) वरुणात्

(iii) कुबेरात् (iv) भरतात्

(20) श्रीरामचन्द्र: कस्याम् नद्याम् विलीन: जात: ?

(i) गङ्गा (ii) यमुना

(iii) नर्मदा (iv) सरयू



http://www.sgbauonline.com/